प्राणानां स्थितिमनुविधातुं कथमपि । धनैर्याच्ञालभ्यैर्नतु परिभवोऽभ्यर्थनफलम् निकारोऽप्येवं पश्चाद्धनमहह भोक्तव्यं हि निधनमिति" शान्तिश० । पञ्चावयवस्य सप्तावयवस्य वा साम्नोऽन्तिमे ४अवयवे च तच्च यस्य कस्यचित्साम्नः अन्तिमभागरूपम् उद्गातृप्रस्तोतृप्रतिहर्तृभिः मिलितैर्युगपद्गेयम् । "ऋतुषु पञ्चविधं सामोपासीत वसन्तो हिङ्कारः ग्रीष्मः प्रस्तावः वर्षा उद्गीथः शरत् प्रतिहारो हेमन्तो निधनम्" "वाचि सप्तविधं सामोपासीत यत्किञ्चित् वाचो हुमिति स हिङ्कारः यत्प्रेति स प्रस्तावो यदेति स आदिः यदुदिति स उद्गीथः यत्प्रतीति स प्रतिहारः यदुपेति स उपद्रवः यन्नीति तन्निधनम्" छा०उ० । निहतं धनं यस्मात् । ५दरिद्रे त्रि० "निधनता सर्वापदामास्पदम्" मृच्छकटिकम्

**निधनवत्** त्रि० निधन+अस्त्यर्थे मतुप् मस्य वः । १मरणयुक्ते निधनावयवयुक्ते २साम्नि न० "पङ्क्त्यै निधनवत् । निधनवत आयतनम्" यजु०१३।५८ "निधनवत् साम" वेददी० ।

**निधा** स्त्री निधीयते धार्य्यते बध्नेनेनानया नि+धा—अ । १पाशसमूहे "निधा पाश्या भवति यन्निधीयते" निरु० ४।२ "चक्षुर्मुमुग्ध्यस्मान् निधयेव बद्धान्" ऋ० १०।७३।११ "निधा पाश्या पाशसमूहस्तया बद्धान्" भा० भावे अ । २निधाने ३अर्पणे च ।

**निधान** न० नि+धा—भावे ल्युट् । १स्थापने निधीयतेऽत्र । २आधारे आश्रये "निधानभूगतं सर्वं सद्यः समधिगच्छति" आगमः । ३लयस्थाने "एतन्नानावताराणां निधानं बीजमव्ययम्" भाग०१।३।६ । ४निधिशब्दार्थे । ५अप्रकाशे सि०कौ० निमूलशब्दे दृश्यम् । "नेरनिधाने" पा० "निधानकुम्भस्य यथैव दुर्गतः" रघुः "हत्वा निधानं पादेन योऽर्थमिच्छति भिक्षया" काशीख०४६अ० । ततः ऋश्या० चतुरर्थ्यां क । निधानक तत्सन्निकृष्टदेशादौ ।

**निधि** पु० नि+धा—आधारे कि । १वस्तुन आधारे "निधिः श्रुतीनां धनसम्पदामिव" माघः "तदित्यमेतस्य निधेः कलानाम्" नैष० । जलनिधिः गुणनिधिरित्यादि २नलिकानामगन्धद्रव्ये ३समुद्रे राजनि० ४विष्णौ परमेश्वरे तस्य सर्वाधारत्वात् तथात्वम् । "सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः" विष्णुस० "प्रलयेऽस्मिन् सर्वं निधीयते इति निधिः" भा० । ५भूखाताज्ञातस्वामिकधनादौ मिताक्ष० निधिविषये विधिभेदस्तत्रोक्तो यथा "अधुना भूमौ चिरनिखातस्य सुवर्णादेर्निधिशब्दवाच्यस्याधिगमे विधिमाह "राजा लब्ध्वा निधिं दद्यात् द्विजेभ्योऽर्द्धं द्विजः पुनः । विद्वानशेषमादद्यात् स सर्वस्यासौ प्रभुर्यतः । इतरेण निधौ लब्धे राजा षष्ठांशमाहरेत् । अनिवेदितविज्ञातो दाप्यस्तं दण्डमेव च" याज्ञ० । उक्तलक्षणं निधिं राजा लब्ध्वार्द्धं ब्राह्मणेभ्यो दत्त्वा शेषं कोषे निवेशयेत् । ब्राह्मणस्तु विद्वान् श्रुताध्ययनसम्पन्नः सदाचारो यदि निधिं लभेत तदा सर्वमेव गृह्णीयात् । यस्मादसौ सर्वस्य जगतः प्रभुः । इतरेण तु राजविद्वद्ब्राह्मणव्यतिरिक्तेनाविद्वद्ब्राह्मणक्षत्रियादिना निधौ लब्धे राजा षष्ठांशमधिगन्त्रे दत्त्वा शेषं निधिं स्वयमाहरेत्" यथाह वशिष्ठः "अप्रज्ञायमानं वित्तं योऽधिगच्छेत् राजा तद्धरेदधिगन्त्रे षष्ठमंशं प्रदद्यात्" इति । गौतमोऽपि "निध्यधिगमो राजधनं न ब्राह्मणस्याभिरूपस्याब्राह्मणोऽप्याख्याता षष्ठमंशं लभेतेत्येके" इति । अनिवेदित इति कर्त्तरि निष्ठा । अनिवेदितश्चासौ विज्ञातश्च राज्ञा" इत्यनिवेदितविज्ञातः । यः कश्चिन्निधिं लब्ध्वा राज्ञे न निवेदितवान् विज्ञातश्च राज्ञा, स सर्वं निधिं दाप्योदण्डञ्च शक्त्यपेक्षया । अथ निधेरपि स्वाम्यागत्य रूपसङ्ख्यादिभिः स्वत्वं भावयति तदा तस्मै राजा निधिं दत्त्वा षष्ठं द्वादशं वांशं स्वयमाहरेत्" यथाह मनुः "ममायमिति यो ब्रूयान्निधिं सत्येन मानवः । तस्याददीत षड्भागं राजा द्वादशमेव वेति" । अंशविकल्पस्तु वर्णकालाद्यपेक्षया वेदितव्यः" । ६महापद्मादिरत्नविशेषे सेवधौ स च नवविधः "महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ । मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव" इति शब्दार्णवः खर्वभिन्नानामष्टानामेव निधित्वं तल्लक्षणञ्च मार्कण्डेयपु० ६०अ० उक्तं यथा

"मार्कण्डेय उवाच । पद्मिनी नाम या विद्या लक्ष्मीस्तस्याश्च देवता । तदाधाराश्च निधयस्तान् मे निगदतः शृणु । तत्र पद्ममहापद्मौ तथा मकरकच्छपौ । मुकुन्दकुन्दौ नीलश्च शङ्खश्चैवाष्टमो निधिः । सत्यां ऋद्धौ भवन्त्येते सद्भिः सह भवन्त्यमी । एते ह्यष्टौ समाख्याता निधयस्तव क्रोष्टुके ! । एभिरालोकितं चित्तं मानुषस्य महामुने ! । यादृक् स्वरूपं भवति तन्मे निगदतः शृणु । पद्मो नाम निधिः पूर्वः स यस्य भवति द्विज ! । स तस्य तत्सुतानां च तत्पुत्राणां च नान्यगः । दाक्षिण्यसारः पुरुषस्तेन चाधिष्ठितो भवेत् । सत्वाचारो